श्री विष्णु सहस्रनाम स्तोत्रं (गरुडपुराणे)

श्री विष्णु सहस्रनाम स्तोत्रं (गरुडपुराणे)

रुद्र उवाच |
संसारसागराद्घोरान्मुच्यते किं जपन् प्रभो |
नरस्तन्मे परं जप्यं कथय त्वं जनार्दन || 1 ||

हरिरुवाच |
परेश्वरं परं ब्रह्म परमात्मानमव्ययं |
विष्णुं नामसहस्रेण स्तुवन्मुक्तो भवेन्नरः || 2 ||

यत्पवित्रं परं जप्यं कथयामि वृषध्वज |
शृणुष्वावहितो भूत्वा सर्वपापविनाशनं || 3 ||

ॐ || वासुदेवो महाविष्णुर्वामनो वासवो वसुः |
बालचंद्रनिभो बालो बलभद्रो बलाधिपः || 4 ||

बलिबंधनकृद्वेधा वरेण्यो वेदवित् कविः |
वेदकर्ता वेदरूपो वेद्यो वेदपरिप्लुतः || 5 ||

वेदांगवेत्ता वेदेशो बलाधारो बलार्दनः |
अविकारो वरेशश्च वरुणो वरुणाधिपः || 6 ||

वीरहा च बृहद्वीरो वंदितः परमेश्वरः |
आत्मा च परमात्मा च प्रत्यगात्मा वियत्परः || 7 ||

पद्मनाभः पद्मनिधिः पद्महस्तो गदाधरः |
परमः परभूतश्च पुरुषोत्तम ईश्वरः || 8 ||

पद्मजंघः पुंडरीकः पद्ममालाधरः प्रियः |
पद्माक्षः पद्मगर्भश्च पर्जन्यः पद्मसंस्थितः || 9 ||

अपारः परमार्थश्च पराणां च परः प्रभुः |
पंडितः पंडितेड्यश्च पवित्रः पापमर्दकः || 10 ||

शुद्धः प्रकाशरूपश्च पवित्रः परिरक्षकः |
पिपासावर्जितः पाद्यः पुरुषः प्रकृतिस्तथा || 11 ||

प्रधानं पृथिवीपद्मं पद्मनाभः प्रियप्रदः |
सर्वेशः सर्वगः सर्वः सर्ववित् सर्वदः सुरः || 12 ||

सर्वस्य जगतो धाम सर्वदर्शी च सर्वभृत् |
सर्वानुग्रहकृद्देवः सर्वभूतहृदिस्थितः || 13 ||

सर्वपूज्यश्च सर्वाद्यः सर्वदेवनमस्कृतः |
सर्वस्य जगतो मूलं सकलो निष्कलोऽनलः || 14 ||

सर्वगोप्ता सर्वनिष्ठः सर्वकारणकारणं |
सर्वध्येयः सर्वमित्रः सर्वदेवस्वरूपधृक् || 15 ||

सर्वाध्यक्षः सुराध्यक्षः सुरासुरनमस्कृतः |
दुष्टानां चासुराणां च सर्वदा घातकोऽंतकः || 16 ||

सत्यपालश्च सन्नाभः सिद्धेशः सिद्धवंदितः |
सिद्धसाध्यः सिद्धसिद्धः साध्यसिद्धो हृदीश्वरः || 17 ||

शरणं जगतश्चैव श्रेयः क्षेमस्तथैव च |
शुभकृच्छोभनः सौम्यः सत्यः सत्यपराक्रमः || 18 ||

सत्यस्थः सत्यसंकल्पः सत्यवित् सत्यदस्तथा |
धर्मो धर्मी च कर्मी च सर्वकर्मविवर्जितः || 19 ||

कर्मकर्ता च कर्मैव क्रिया कार्यं तथैव च |
श्रीपतिर्नृपतिः श्रीमान् सर्वस्य पतिरूर्जितः || 20 ||

सदेवानां पतिश्चैव वृष्णीनां पतिरीडितः |
पतिर्हिरण्यगर्भस्य त्रिपुरांतपतिस्तथा || 21 ||

पशूनां च पतिः प्रायो वसूनां पतिरेव च |
पतिराखंडलस्यैव वरुणस्य पतिस्तथा || 22 ||

वनस्पतीनां च पतिरनिलस्य पतिस्तथा |
अनलस्य पतिश्चैव यमस्य पतिरेव च || 23 ||

कुबेरस्य पतिश्चैव नक्षत्राणां पतिस्तथा |
ओषधीनां पतिश्चैव वृक्षाणां च पतिस्तथा || 24 ||

नागानां पतिरर्कस्य दक्षस्य पतिरेव च |
सुहृदां च पतिश्चैव नृपाणां च पतिस्तथा || 25 ||

गंधर्वाणां पतिश्चैव असूनां पतिरुत्तमः |
पर्वतानां पतिश्चैव निम्नगानां पतिस्तथा || 26 ||

सुराणां च पतिः श्रेष्ठः कपिलस्य पतिस्तथा |
लतानां च पतिश्चैव वीरुधां च पतिस्तथा || 27 ||

मुनीनां च पतिश्चैव सूर्यस्य पतिरुत्तमः |
पतिश्चंद्रमसः श्रेष्ठः शुक्रस्य पतिरेव च || 28 ||

ग्रहाणां च पतिश्चैव राक्षसानां पतिस्तथा |
किन्नराणां पतिश्चैव द्विजानां पतिरुत्तमः || 29 ||

सरितां च पतिश्चैव समुद्राणां पतिस्तथा |
सरसां च पतिश्चैव भूतानां च पतिस्तथा || 30 ||

वेतालानां पतिश्चैव कूष्मांडानां पतिस्तथा |
पक्षिणां च पतिः श्रेष्ठः पशूनां पतिरेव च || 31 ||

महात्मा मंगळो मेयो मंदरो मंदरेश्वरः |
मेरुर्माता प्रमाणं च माधवो मलवर्जितः || 32 ||

मालाधरो महादेवो महादेवेन पूजितः |
महाशांतो महाभागो मधुसूदन एव च || 33 ||

महावीर्यो महाप्राणो मार्कंडेयर्षिवंदितः |
मायात्मा मायया बद्धो मायया तु विवर्जितः || 34 ||

मुनिस्तुतो मुनिर्मैत्रो महानासो महाहनुः |
महाबाहुर्महादांतो मरणेन विवर्जितः || 35 ||

महावक्त्रो महात्मा च महाकायो महोदरः |
महापादो महाग्रीवो महामानी महामनाः || 36 ||

महागतिर्महाकीर्तिर्महारूपो महासुरः |
मधुश्च माधवश्चैव महादेवो महेश्वरः || 37 ||

मखेज्यो मखरूपी च माननीयो मखेश्वरः |
महावातो महाभागो महेशोऽतीतमानुषः || 38 ||

मानवश्च मनुश्चैव मानवानां प्रियंकरः |
मृगश्च मृगपूज्यश्च मृगाणां च पतिस्तथा || 39 ||

बुधस्य च पतिश्चैव पतिश्चैव बृहस्पतेः |
पतिः शनैश्चरस्यैव राहोः केतोः पतिस्तथा || 40 ||

लक्ष्मणो लक्षणश्चैव लंबोष्ठो ललितस्तथा |
नानालंकारसंयुक्तो नानाचंदनचर्चितः || 41 ||

नानारसोज्ज्वलद्वक्त्रो नानापुष्पोपशोभितः |
रामो रमापतिश्चैव सभार्यः परमेश्वरः || 42 ||

रत्नदो रत्नहर्ता च रूपी रूपविवर्जितः |
महारूपोग्ररूपश्च सौम्यरूपस्तथैव च || 43 ||

नीलमेघनिभः शुद्धः कालमेघनिभस्तथा |
धूमवर्णः पीतवर्णो नानारूपो ह्यवर्णकः || 44 ||

विरूपो रूपदश्चैव शुक्लवर्णस्तथैव च |
सर्ववर्णो महायोगी यज्ञो यज्ञकृदेव च || 45 ||

सुवर्णवर्णवांश्चैव सुवर्णाख्यस्तथैव च |
सुवर्णावयवश्चैव सुवर्णः स्वर्णमेखलः || 46 ||

सुवर्णस्य प्रदाता च सुवर्णेशस्तथैव च |
सुवर्णस्य प्रियश्चैव सुवर्णाढ्यस्तथैव च || 47 ||

सुपर्णी च महापर्णी सुपर्णस्य च कारणं |
वैनतेयस्तथादित्य आदिरादिकरः शिवः || 48 ||

कारणं महतश्चैव प्रधानस्य च कारणं |
बुद्धीनां कारणं चैव कारणं मनसस्तथा || 49 ||

कारणं चेतसश्चैव अहंकारस्य कारणं |
भूतानां कारणं तद्वत्कारणं च विभावसोः || 50 ||

आकाशकारणं तद्वत्पृथिव्याः कारणं परं |
अंडस्य कारणं चैव प्रकृतेः कारणं तथा || 51 ||

देहस्य कारणं चैव चक्षुषश्चैव कारणं |
श्रोत्रस्य कारणं तद्वत्कारणं च त्वचस्तथा || 52 ||

जिह्वायाः कारणं चैव प्राणस्यैव च कारणं |
हस्तयोः कारणं तद्वत्पादयोः कारणं तथा || 53 ||

वाचश्च कारणं तद्वत्पायोश्चैव तु कारणं |
इंद्रस्य कारणं चैव कुबेरस्य च कारणं || 54 ||

यमस्य कारणं चैव ईशानस्य च कारणं |
यक्षाणां कारणं चैव रक्षसां कारणं परं || 55 ||

नृपाणां कारणं श्रेष्ठं धर्मस्यैव तु कारणं |
जंतूनां कारणं चैव वसूनां कारणं परं || 56 ||

मनूनां कारणं चैव पक्षिणां कारणं परं |
मुनीनां कारणं श्रेष्ठ योगिनां कारणं परं || 57 ||

सिद्धानां कारणं चैव यक्षाणां कारणं परं |
कारणं किन्नराणां च गंधर्वाणां च कारणं || 58 ||

नदानां कारणं चैव नदीनां कारणं परं |
कारणं च समुद्राणां वृक्षाणां कारणं तथा || 59 ||

कारणं वीरुधां चैव लोकानां कारणं तथा |
पाताल कारणं चैव देवानां कारणं तथा || 60 ||

सर्पाणां कारणं चैव श्रेयसां कारणं तथा |
पशूनां कारणं चैव सर्वेषां कारणं तथा || 61 ||

देहात्मा चेंद्रियात्मा च आत्मा बुद्धेस्तथैव च |
मनसश्च तथैवात्मा चात्माहंकारचेतसः || 62 ||

जाग्रतः स्वपतश्चात्मा महदात्मा परस्तथा |
प्रधानस्य परात्मा च आकाशात्मा ह्यपां तथा || 63 ||

पृथिव्याः परमात्मा च रसस्यात्मा तथैव च |
गंधस्य परमात्मा च रूपस्यात्मा परस्तथा || 64 ||

शब्दात्मा चैव वागात्मा स्पर्शात्मा पुरुषस्तथा |
श्रोत्रात्मा च त्वगात्मा च जिह्वात्मा परमस्तथा || 65 ||

घ्राणात्मा चैव हस्तात्मा पादात्मा परमस्तथा |
उपस्थस्य तथैवात्मा पाय्वात्मा परमस्तथा || 66 ||

इंद्रात्मा चैव ब्रह्मात्मा रुद्रात्मा च मनोस्तथा |
दक्षप्रजापतेरात्मा सत्यात्मा परमस्तथा || 67 ||

ईशात्मा परमात्मा च रौद्रात्मा मोक्षविद्यतिः |
यत्नवांश्च तथा यत्नश्चर्मी खड्गी मुरांतकः || 68 ||

ह्रीप्रवर्तनशीलश्च यतीनां च हिते रतः |
यतिरूपी च योगी च योगिध्येयो हरिः शितिः || 69 ||

संविन्मेधा च कालश्च ऊष्मा वर्षा मतिस्तथा |
संवत्सरो मोक्षकरो मोहप्रध्वंसकस्तथा || 70 ||

मोहकर्ता च दुष्टानां मांडव्यो वडवामुखः |
संवर्तः कालकर्ता च गौतमो भृगुरंगिराः || 71 ||

अत्रिर्वसिष्ठः पुलहः पुलस्त्यः कुत्स एव च |
याज्ञवल्क्यो देवलश्च व्यासश्चैव पराशरः || 72 ||

शर्मदश्चैव गांगेयो हृषीकेशो बृहच्छ्रवाः |
केशवः क्लेशहंता च सुकर्णः कर्णवर्जितः || 73 ||

नारायणो महाभागः प्राणस्य पतिरेव च |
अपानस्य पतिश्चैव व्यानस्य पतिरेव च || 74 ||

उदानस्य पतिः श्रेष्ठः समानस्य पतिस्तथा |
शब्दस्य च पतिः श्रेष्ठः स्पर्शस्य पतिरेव च || 75 ||

रूपाणां च पतिश्चाद्यः खड्गपाणिर्हलायुधः |
चक्रपाणिः कुंडली च श्रीवत्सांकस्तथैव च || 76 ||

प्रकृतिः कौस्तुभग्रीवः पीतांबरधरस्तथा |
सुमुखो दुर्मुखश्चैव मुखेन तु विवर्जितः || 77 ||

अनंतोऽनंतरूपश्च सुनखः सुरमंदरः |
सुकपोलो विभुर्जिष्णुर्भ्राजिष्णुश्चेषुधीस्तथा || 78 ||

हिरण्यकशिपोर्हंता हिरण्याक्षविमर्दकः |
निहंता पूतनायाश्च भास्करांतविनाशनः || 79 ||

केशिनो दलनश्चैव मुष्टिकस्य विमर्दकः |
कंसदानवभेत्ता च चाणूरस्य प्रमर्दकः || 80 ||

अरिष्टस्य निहंता च अक्रूरप्रिय एव च |
अक्रूरः क्रूररूपश्च अक्रूरप्रियवंदितः || 81 ||

भगहा भगवान् भानुस्तथा भागवतः स्वयं |
उद्धवश्चोद्धवस्येशो ह्युद्धवेन विचिंतितः || 82 ||

चक्रधृक् चंचलश्चैव चलाचलविवर्जितः |
अहंकारोपमश्चित्तं गगनं पृथिवी जलं || 83 ||

वायुश्चक्षुस्तथा श्रोत्रं जिह्वा च घ्राणमेव च |
वाक्पाणिपादजवनः पायूपस्थस्तथैव च || 84 ||

शंकरश्चैव सर्वश्च क्षांतिदः क्षांतिकृन्नरः |
भक्तप्रियस्तथा भर्ता भक्तिमान् भक्तिवर्धनः || 85 ||

भक्तस्तुतो भक्तपरः कीर्तिदः कीर्तिवर्धनः |
कीर्तिर्दीप्तिः क्षमाकांतिर्भक्तश्चैव दया परा || 86 ||

दानं दाता च कर्ता च देवदेवप्रियः शुचिः |
शुचिमान् सुखदो मोक्षः कामश्चार्थः सहस्रपात् || 87 ||

सहस्रशीर्षा वैद्यश्च मोक्षद्वारं तथैव च |
प्रजाद्वारं सहस्राक्षः सहस्रकर एव च || 88 ||

शुक्रश्च सुकिरीटी च सुग्रीवः कौस्तुभस्तथा |
प्रद्युम्नश्चानिरुद्धश्च हयग्रीवश्च सूकरः || 89 ||

मत्स्यः परशुरामश्च प्रह्लादो बलिरेव च |
शरण्यश्चैव नित्यश्च बुद्धो मुक्तः शरीरभृत् || 90 ||

खरदूषणहंता च रावणस्य प्रमर्दनः |
सीतापतिश्च वर्धिष्णुर्भरतश्च तथैव च || 91 ||

कुंभेंद्रजिन्निहंता च कुंभकर्णप्रमर्दनः |
नरांतकांतकश्चैव देवांतकविनाशनः || 92 ||

दुष्टासुरनिहंता च शंबरारिस्तथैव च |
नरकस्य निहंता च त्रिशीर्षस्य विनाशनः || 93 ||

यमलार्जुनभेत्ता च तपोहितकरस्तथा |
वादित्रं चैव वाद्यं च बुद्धश्चैव वरप्रदः || 94 ||

सारः सारप्रियः सौरः कालहंतृनिकृंतनः |
अगस्त्यो देवलश्चैव नारदो नारदप्रियः || 95 ||

प्राणोऽपानस्तथा व्यानो रजः सत्त्वं तमः शरत् |
उदानश्च समानश्च भेषजं च भिषक् तथा || 96 ||

कूटस्थः स्वच्छरूपश्च सर्वदेहविवर्जितः |
चक्षुरिंद्रियहीनश्च वागिंद्रियविवर्जितः || 97 ||

हस्तेंद्रियविहीनश्च पादाभ्यां च विवर्जितः |
पायूपस्थविहीनश्च मरुतापविवर्जितः || 98 || [महाताप]

प्रबोधेन विहीनश्च बुद्ध्या चैव विवर्जितः |
चेतसा विगतश्चैव प्राणेन च विवर्जितः || 99 ||

अपानेन विहीनश्च व्यानेन च विवर्जितः |
उदानेन विहीनश्च समानेन विवर्जितः || 100 ||

आकाशेन विहीनश्च वायुना परिवर्जितः |
अग्निना च विहीनश्च उदकेन विवर्जितः || 101 ||

पृथिव्या च विहीनश्च शब्देन च विवर्जितः |
स्पर्शेन च विहीनश्च सर्वरूपविवर्जितः || 102 ||

रागेण विगतश्चैव अघेन परिवर्जितः |
शोकेन रहितश्चैव वचसा परिवर्जितः || 103 ||

रजोविवर्जितश्चैव विकारैः षड्भिरेव च |
कामेन वर्जितश्चैव क्रोधेन परिवर्जितः || 104 ||

लोभेन विगतश्चैव दंभेन च विवर्जितः |
सूक्ष्मश्चैव सुसूक्ष्मश्च स्थूलात्स्थूलतरस्तथा || 105 ||

विशारदो बलाध्यक्षः सर्वस्य क्षोभकस्तथा |
प्रकृतेः क्षोभकश्चैव महतः क्षोभकस्तथा || 106 ||

भूतानां क्षोभकश्चैव बुद्धेश्च क्षोभकस्तथा |
इंद्रियाणां क्षोभकश्च विषयक्षोभकस्तथा || 107 ||

ब्रह्मणः क्षोभकश्चैव रुद्रस्य क्षोभकस्तथा |
अगम्यश्चक्षुरादेश्च श्रोत्रागम्यस्तथैव च || 108 ||

त्वचा न गम्यः कूर्मश्च जिह्वाऽग्राह्यस्तथैव च |
घ्राणेंद्रियागम्य एव वाचाऽग्राह्यस्तथैव च || 109 ||

अगम्यश्चैव पाणिभ्यां पदागम्यस्तथैव च |
अग्राह्यो मनसश्चैव बुद्ध्याऽग्राह्यो हरिस्तथा || 110 ||

अहं बुद्ध्या तथाऽग्राह्यश्चेतसाऽग्राह्य एव च |
शंखपाणिश्चाव्ययश्च गदापाणिस्तथैव च || 111 ||

शार्ङ्गपाणिश्च कृष्णश्च ज्ञानमूर्तिः परंतपः |
तपस्वी ज्ञानगम्यो हि ज्ञानी ज्ञानविदेव च || 112 ||

ज्ञेयश्च ज्ञेयहीनश्च ज्ञप्तिश्चैतन्यरूपकः |
भावो भाव्यो भवकरो भावनो भवनाशनः || 113 ||

गोविंदो गोपतिर्गोपः सर्वगोपीसुखप्रदः |
गोपालो गोगतिश्चैव गोमतिर्गोधरस्तथा || 114 ||

उपेंद्रश्च नृसिंहश्च शौरिश्चैव जनार्दनः |
आरणेयो बृहद्भानुर्बृहद्दीप्तिस्तथैव च || 115 ||

दामोदरस्त्रिकालश्च कालज्ञः कालवर्जितः |
त्रिसंध्यो द्वापरं त्रेता प्रजाद्वारं त्रिविक्रमः || 116 ||

विक्रमो दंडहस्तश्च ह्येकदंडी त्रिदंडधृक् |
सामभेदस्तथोपायः सामरूपी च सामगः || 117 ||

सामवेदो ह्यथर्वश्च सुकृतः सुतरूपणः |
अथर्ववेदविच्चैव ह्यथर्वाचार्य एव च || 118 ||

ऋग्रूपी चैव ऋग्वेद ऋग्वेदेषु प्रतिष्ठितः |
यजुर्वेत्ता यजुर्वेदो यजुर्वेदविदेकपात् || 119 ||

बहुपाच्च सुपाच्चैव तथैव च सहस्रपात् |
चतुष्पाच्च द्विपाच्चैव स्मृतिर्न्यायो यमो बली || 120 ||

सन्न्यासी चैव सन्न्यासश्चतुराश्रम एव च |
ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षुकः || 121 ||

ब्राह्मणः क्षत्रियो वैश्यः शूद्रो वर्णस्तथैव च |
शीलदः शीलसंपन्नो दुःशीलपरिवर्जितः || 122 ||

मोक्षोऽध्यात्मसमाविष्टः स्तुतिः स्तोता च पूजकः |
पूज्यो वाक्करणं चैव वाच्यं चैव तु वाचकः || 123 ||

वेत्ता व्याकरणं चैव वाक्यं चैव च वाक्यवित् |
वाक्यगम्यस्तीर्थवासी तीर्थस्तीर्थी च तीर्थवित् || 124 ||

तीर्थादिभूतः सांख्यश्च निरुक्तं त्वधिदैवतं |
प्रणवः प्रणवेशश्च प्रणवेन प्रवंदितः || 125 ||

प्रणवेन च लक्ष्यो वै गायत्री च गदाधरः |
शालग्रामनिवासी च शालग्रामस्तथैव च || 126 ||

जलशायी योगशायी शेषशायी कुशेशयः |
महीभर्ता च कार्यं च कारणं पृथिवीधरः || 127 ||

प्रजापतिः शाश्वतश्च काम्यः कामयिता विराट् |
सम्राट् पूषा तथा स्वर्गो रथस्थः सारथिर्बलं || 128 ||

धनी धनप्रदो धन्यो यादवानां हिते रतः |
अर्जुनस्य प्रियश्चैव ह्यर्जुनो भीम एव च || 129 ||

पराक्रमो दुर्विषहः सर्वशास्त्रविशारदः |
सारस्वतो महाभीष्मः पारिजातहरस्तथा || 130 ||

अमृतस्य प्रदाता च क्षीरोदः क्षीरमेव च |
इंद्रात्मजस्तस्य गोप्ता गोवर्धनधरस्तथा || 131 ||

कंसस्य नाशनस्तद्बद्धस्तिपो हस्तिनाशनः |
शिपिविष्टः प्रसन्नश्च सर्वलोकार्तिनाशनः || 132 ||

मुद्रो मुद्राकरश्चैव सर्वमुद्राविवर्जितः |
देही देहस्थितश्चैव देहस्य च नियामकः || 133 ||

श्रोता श्रोत्रनियंता च श्रोतव्यः श्रवणं तथा |
त्वक्-स्थितश्च स्पर्शयित्वा स्पृश्यं च स्पर्शनं तथा || 134 ||

रूपद्रष्टा च चक्षुःस्थो नियंता चक्षुषस्तथा |
दृश्यं चैव तु जिह्वास्थो रसज्ञश्च नियामकः || 135 ||

घ्राणस्थो घ्राणकृद्घ्राता घ्राणेंद्रियनियामकः |
वाक्-स्थो वक्ता च वक्तव्यो वचनं वाङ्नियामकः || 136 ||

प्राणिस्थः शिल्पकृच्छिल्पो हस्तयोश्च नियामकः |
पदव्यश्चैव गंता च गंतव्यं गमनं तथा || 137 ||

नियंता पादयोश्चैव पाद्यभाक् च विसर्गकृत् |
विसर्गस्य नियंता च ह्युपस्थस्थः सुखं तथा || 138 ||

उपस्थस्य नियंता च तदानंदकरश्च ह |
शत्रुघ्नः कार्तवीर्यश्च दत्तात्रेयस्तथैव च || 139 ||

अलर्कस्य हितश्चैव कार्तवीर्यनिकृंतनः |
कालनेमिर्महानेमिर्मेघो मेघपतिस्तथा || 140 ||

अन्नप्रदोऽन्नरूपी च ह्यन्नादोऽन्नप्रवर्तकः |
धूमकृद्धूमरूपश्च देवकीपुत्र उत्तमः || 141 ||

देवक्यानंदनो नंदो रोहिण्याः प्रिय एव च |
वसुदेवप्रियश्चैव वसुदेवसुतस्तथा || 142 ||

दुंदुभिर्हासरूपश्च पुष्पहासस्तथैव च |
अट्टहासप्रियश्चैव सर्वाध्यक्षः क्षरोऽक्षरः || 143 ||

अच्युतश्चैव सत्येशः सत्यायाश्च प्रियो वरः |
रुक्मिण्याश्च पतिश्चैव रुक्मिण्यावल्लभस्तथा || 144 ||

गोपीनां वल्लभश्चैव पुण्यश्लोकश्च विश्रुतः |
वृषाकपिर्यमो गुह्यो मुकुलश्च बुधस्तथा || 145 ||

राहुः केतुर्ग्रहो ग्राहो गजेंद्रमुखमेलकः |
ग्राहस्य विनिहंता च ग्रामणी रक्षकस्तथा || 146 ||

किन्नरश्चैव सिद्धश्च छंदः स्वच्छंद एव च |
विश्वरूपो विशालाक्षो दैत्यसूदन एव च || 147 ||

अनंतरूपो भूतस्थो देवदानवसंस्थितः |
सुषुप्तिस्थः सुषुप्तिश्च स्थानं स्थानांत एव च || 148 ||

जगत्स्थश्चैव जागर्ता स्थानं जागरितं तथा |
स्वप्नस्थः स्वप्नवित्स्वप्नस्थानं स्वप्नस्तथैव च || 149 ||

जाग्रत्स्वप्नसुषुप्तेश्च विहीनो वै चतुर्थकः |
विज्ञानं वेद्यरूपं च जीवो जीवयिता तथा || 150 ||

भुवनाधिपतिश्चैव भुवनानां नियामकः |
पातालवासी पातालं सर्वज्वरविनाशनः || 151 ||

परमानंदरूपी च धर्माणां च प्रवर्तकः |
सुलभो दुर्लभश्चैव प्राणायामपरस्तथा || 152 ||

प्रत्याहारो धारकश्च प्रत्याहारकरस्तथा |
प्रभा कांतिस्तथा ह्यर्चिः शुद्धस्फटिकसन्निभः || 153 ||

अग्राहश्चैव गौरश्च सर्वः शुचिरभिष्टुतः |
वषट्कारो वषड्वौषट् स्वधा स्वाहा रतिस्तथा || 154 ||

पक्ता नंदयिता भोक्ता बोद्धा भावयिता तथा |
ज्ञानात्मा चैव देहात्मा भूमा सर्वेश्वरेश्वरः || 155 ||

नदी नंदी च नंदीशो भारतस्तरुनाशनः |
चक्रपः श्रीपतिश्चैव नृपाणां चक्रवर्तिनां || 156 ||

ईशश्च सर्वदेवानां द्वारकासंस्थितस्तथा |
पुष्करः पुष्कराध्यक्षः पुष्करद्वीप एव च || 157 ||

भरतो जनको जन्यः सर्वाकारविवर्जितः |
निराकारो निर्निमित्तो निरातंको निराश्रयः || 158 ||

इति नामसहस्रं ते वृषभध्वज कीर्तितं |
देवस्य विष्णोरीशस्य सर्वपापविनाशनं || 159 ||

पठन् द्विजश्च विष्णुत्वं क्षत्रियो जयमाप्नुयात् |
वैश्यो धनं सुखं शूद्रो विष्णुभक्तिसमन्वितः || 160 ||

इति श्रीगारुडे महापुराणे आचारकांडे श्री विष्णु सहस्रनाम स्तोत्रं नाम पंचदशोऽध्यायः ||